# Shri Gosakhapanchavimshatih

# શ્રીગોસખપઞ્ચવિંશતિઃ

## Document Information

```
Text title : Shri Gosakhapanchavimshatih 05 12
File name : gosakhapanchaviMshatiH.itx
Category : vishhnu, krishna, viMshati
Location : doc_vishhnu
Proofread by : Rajesh Thyagarajan
Description/comments : From stotrArNavaH 05-12
Latest update : October 9, 2021
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીગોસખપઞ્ચવિંશતિઃ

માર્કણ્ડેયકવેરજાખગપતિપ્રહ્લાદસંસેવિતં
  સેવે ગોસખમમ્બુજાક્ષમમલં કારુણ્યવારાં નિધિમ્ ।
ભૂમૌ ચેતનરક્ષણાર્થમજરો યોઽવાતરચ્છ્રીપતિઃ
  સ્વચ્છામ્ભોભરદર્શપુષ્કરણિકાતીરે સુરમ્યો હરિઃ ॥ ૧॥

વન્દિષીય જલધેસ્સુતાપતિં
  નન્દગોપસુતમાશ્રિતેષ્ટદમ્ ।
નીલમેઘનિભવિગ્રહં હરિં
  દર્શતીર્થતટમાસ્થિતં વિભુમ્ ॥ ૨॥

શ્રીમન્તં વરદમમું ભજેઽહમા દ્યં
  ગોપાલં વ્રજયુવતીવિહારલોલમ્ ।
દેદીપ્યન્મણિમયહારવક્ષસં તં
  ગોવિન્દં નિગમશિખાસુ વેદ્યરૂપમ્ ॥ ૩॥

શ્રીગોસખ ત્વમધિકોઽપિ મહેશ્વરાણાં
  વેદાન્ત વેદ્યનિજરૂપગુણપ્રતાપઃ ।
બદ્ધોઽસિ યત્ધનદપુત્ર વિમોક્ષહેતુ-
  રજ્જ્વા સ્ત્રિયા કથય કિં ભવતો હિ લીલા ॥ ૪॥

શ્રીદર્શતીર્થતટખેલનતત્પરાદૌ
  બાણાહવે જિતમપિ શ્રિતકામધેનુઃ ।
પુત્રાર્થમિન્દુશિરસં ભગવાન્ હિમાદ્રૌ
  ગત્વા ત્વયાચત ભવાન્ કિમહો કરોતિ ॥ ૫॥

પુરા જરાસન્ધમહોઽવધી રિપું
  ન માનવોઽશક્ત ભુજાહવે સકૃત્ ।
અનીનયઃ પુત્રમુદારશક્તિકો
  ગુરોઃ સમીપં યદુવંશનાયકઃ ॥ ૬॥

વિચિત્રતેજોગુણયુક્તરૂપઃ
    સાલદ્રુમાદ્રીનિષુણા બિભેદ ।
ભવાન્ યયાચે કપિમલ્પવીર્યં
    મમાનુકૂલ્યં કુરુ સૂર્યજેતિ ॥ ૭॥

શ્રીગોસખ શ્રિતજનાવનબદ્ધદીક્ષ
    દેવાદિનાથમકુટોજ્જ્વલરત્નકાન્ત્યા ।
નીરાજિતાઙ્ઘ્રિજલજદ્વય પાહિ માં ત્વં
    કારુણ્યદર્શિતશિશુક્રમ દેવદેવ ॥ ૮॥

ભજે મુરારે ભવદીયપાદ-
    મનન્યબુદ્ધ્યા ભવવાર્ધિપોતમ્ ।
ઉદાર માં પાલય મન્તુગેહં
    ન ચેદ્ભવેદ્વત્સલતા પ્રયાતા ॥ ૯॥

સ્વામિન્નભીષ્ટવરદાખિલલોકબન્ધો
    સૂર્યેન્દુલોચન રતીશ સુરમ્યમૂર્તે ।
રત્નોજ્જ્વલન્મકુટરમ્યશિરસ્ક પાહિ
    શ્રીદર્શપુષ્કરિણિકાતટવાસલોલ ॥ ૧૦॥

વન્દે તં ગુણવારિધિં વ્રજસુતા લીલાપરં ગોસખં
    વત્સાઘાશ્વદવાગ્નિધેનુકતૃણાવર્તેભમલ્લાન્તકમ્ ।
લીલામાનુષવિગ્રહં ગિરિવરં મુક્ત્વા શચીશાજ્ઞયા (ગિરિવરં ધૃત્વા)
    વર્ષત્યમ્બુવહે ભૃશં નિજ જનસ્ત્રીગોપરક્ષાકરમ્ ॥ ૧૧॥

યો નનર્ત સ્વનન્નૂપુરાણોજપ-
    દ્વિસ્તરે કાલિયસ્યોત્તમાઙ્ગે ચિરમ્ ।
ચઞ્ચલદ્બર્હનીલાલકાસ્યામ્બુજં
    દર્શતીર્થત્ય કૂલે હરી રાજતે ॥ ૧૨॥

પાર્શ્વસ્થયા શ્રિયાસૌ
    નન્દતનૂજો વિરાજતે શાર્ઙ્ગી ।
ઐન્દ્રધનુર્વૈદ્યુતરક્તો
    નીલામ્બુધરો દ્યુરત્રેવ ઇવાકાશે ॥ ૧૩॥

ક્ષીરાબ્ધેર્મથનં ચકારિથ પુરા ધૃત્વાચલં મન્થરં

કૂર્માકારધરો દ્વિશીર્ષમહિરાડજ્જ્વા કરાબ્જેન યઃ ।
આલમ્બ્યાશ્રિતવત્સલઃ સુરગણૈઃ સમ્પ્રાર્થ્યમાનઃ સુધાં
પ્રાદાદત્ર ભવાન્ જનાવનકૃતે ત્વં સનિધત્સ્વ સ્વયમ્ ॥ ૧૪॥

શ્રીપાદપદ્મૌ ભજ માનસાલે
સન્તાપહારપ્રથિતૌ મનોજ્ઞૌ ।
ઉજ્જીવનેચ્છા યદિ તે મુરારે
શ્રીગોસખસ્યાબ્ધિસુતાસખસ્ય ॥ ૧૫॥

પૂર્વં વ્રજે સુનવનીતમચૂચુરસ્ત્વં-
ગોપીગૃહેષુ દયયાદૃતશૈશવોઽત્ર ।
અદ્યાપિ દેવ ગુણમર્મવિચિત્રવેષૈ-
ર્ગૃહ્ણાસિ સેવકજનસ્ય મનો રમેશ ॥ ૧૬॥

ગોવિન્દ ગોપસુત નક્તઞ્ચરેશસુતનાગાસ્ત્રમોષિતબલો
નિસ્સગકોઽપિ રણવ્રજ્યા હરઘ્ન રઘુવીર ... લઘુબલઃ ।
આદાતુકામ રુધિરા ... શયિનેતુરતિદુર્ધર્ષ એવ ભગવન્
સોઽયં દયામ્બુનિધિરસ્માન્ હિ પાતુમિહ માન્ઘોલ્બણાન્ સુવસસી(?) ॥ ૧૭॥

વવન્દે બિમ્બોષ્ઠં મણિમયકિરીટોજ્જ્વલમમું
સુનાસં નીલાન્તોદ્ધાનિતઘનું સુભ્રુલતિકમ્ ।
દરસ્મેરાસ્યેન્દું પરિસસૂબાહું સવસનં
પયોજાક્ષં રમ્ભાર્તિકરવરોરું ભુજપદં ? ॥ ૧૮॥

રક્તાબ્જલોચનાઢ્યદેવં ચક્રગદાખડ્ગધરં શાર્ઙ્ગડ્યમ્ ।
તં નૌમિ ગોપસૂનું ગોસખમમ્ભોજસમ્ભવદ્ધ્યેયમ્ ॥ ૧૯॥

ગોસખમમ્ભોજલોચનં નૌમિ પીતવાસસમ્ ।
હૃદયાનિકેતનં પ્રભું પિઞ્છાચૂડં સુન્દરાઙ્ગકમ્ ॥ ૨૦॥

કુચેલેનાનીતં પૃથુકમતિરિક્તેન ભગવન્
સુભુક્ત્વાતિપ્રીત્યા ફલસુમજલાદ્યૈરુપચરન્ ।
ભવાન્ પ્રાદાત્તસ્મૈ નિરવધિકમૈશ્વર્યમતુલં
રમેશોદારત્વં ત્વયિ તુ કિમહોઽગણ્યવિભવમ્ ॥ ૨૧॥

શરણમેતિ મહઃ પરમં પરં
ગુણનિકેતનમબ્ધિભવાસખમ્ ।

ત્રિદશસેવ્યમચિન્ત્યમજં સ્થિરં
    લસિતદર્શતટે સ્થિતમાદિમમ્ ॥ ૨૨॥

છેત્તા કંસાદિસકલશત્રોઃ
    ભર્તા રત્નામ્બુજાતદયિતાયાઃ ।
કર્તા બ્રહ્માદિસકલસૃષ્ટેઃ
    ભોક્તા સ સ્યાદધિકમુદે મે ॥ ૨૩॥

દુષ્ટક્ષોણીપતિનિકુરુમ્બં
    હત્વા તુત્વા તદ્રક્તસરસિ પૂર્વકૃષ્ણ ।
હે રામ ત્વં પિતૃકુલત્રસ્તરુગ્ણો
    નૈવાપામ્ભોઽપ્યપાય ઉર્વીભારમ્ ॥ ૨૪॥

શઠમથનવરવરમુનિમુખકલિત-
    નુતિવચનવિષયમિહ વરયે ।
પશુસખમહિપતિશયમુપરિચર-
    વસુનરપતિવિનુતપદકમલમ્ ॥ ૨૫॥

રક્તાબ્જનાયિકાં તાં કરુણારૂપામહમ્ભજેય મુગ્ધાઙ્ગીમ્ ।
અર્થિસખકલ્પવલ્લીં ગોસખદયિતાં સભૂષણાં દેવીમ્ ॥ ૨૬॥

નિઃસમાભ્યધિકો લોકે જીયાદાચન્દ્રતારકમ્ ।
કૃષ્ણો રક્તાબ્જનાયિકાનાથો ભક્તેષ્ટદોઽધિકમ્ ॥ ૨૭॥

ઇતિ સુદર્શનવરદદાસકૃતગોસખપઞ્ચવિંશતિઃ સમ્પૂર્ણા ।

Proofread by Rajesh Thyagarajan

*Shri Gosakhapanchavimshatih*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*